# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-3) (Old)** | **प्रश्नपत्रम् – 6** | गुणाः –70 |
| विषयः – साहित्यम् | **कोड –C.C.2.3.6** | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –15/10/2019 | सन्दर्भग्रन्थः – वेणीसंहारम् | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधोलिखितश्लोकेषु द्वयोः श्लोकयोः ससन्दर्भं व्याख्या विधेया।** १०

१ सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः।
निपतन्ति धार्तराष्ट्राः कालवशान्मोदिनीपृष्ठे॥

२ निर्वाणवैरदहनाः प्रशमादरीणां नन्दन्तु पाण्डुतनयाः सह माधवेन।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुताः सभृत्याः॥

३ मथ्नामि कौरवशतं समरे न कोपाद् दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
सञ्चूर्णयामि गदया न सुयोधनोरू सन्धिं करोतु भवतां नृपतिः प्रणेन॥

**प्रश्न २ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत।** १०

१ वेणीसंहारनाटकस्य प्रथमाङ्कस्य कथासारं लिखत।

२ भट्टस्य जीवनपरिचयं लिखत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ निम्नेलिखितेषु द्वयोः श्लोकयोः सप्रसङ्गं व्याख्या कार्या।** १०

१ सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम्।
स्वबलेन निहन्ति संयुगे न चिरात्पाण्डुसुतं सुयोधनः॥

२ ग्रहाणां चरितं स्वप्नोऽनिमित्तान्युपयाचितम्।

फलन्ति काकतालीयं तेभ्यः प्राज्ञा न बिभ्यति ॥

३ धर्मात्मजं प्रति यमौ च कथैव नास्ति मध्ये वृकोदरकिरीटभृतोर्बलेन ।
एकोऽपि विस्फुरितमण्डलचापचक्रं कः सिन्धुराजमभिषेणयितुं समर्थः ॥

**प्रश्न ४ अधः प्रदत्तयोः प्रश्नयोः कश्चिदेकः प्रश्नः विवर्ण्यः ।** १०

१ दुर्योधनस्य चरित्रचित्रणं कुरुत ।

२ द्वितीयाङ्कस्य सारांशं लिखत ।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ निम्नलिखितेभ्यः श्लोकेभ्यः द्वयोः श्लोकयोः सप्रसङ्गं व्याख्या कार्या ।** १०

१ आजन्मनो न वितथं भवता किलोक्तं न द्वेक्षि यज्जनमतस्त्वमजातशत्रुः ।
ताते गुरौ द्विजवरे मम भाग्यदोषात् सर्वं तदेकपद एव कथं निरस्तम् ॥

२ प्रत्यक्षमात्तधनुषां मनुजेश्वराणां प्रायोपवेशसदृशं व्रतमास्थितस्य ।
तातस्य मे पलितमौलिनिरस्तकेशे, व्यापारितं शिरसि शस्त्रमशस्त्रपाणेः ॥

३ तातस्तव प्रणयवान्स पितुः सखा मे, शस्त्रे यथा तव गुरुः स तथा ममापि ।
किं तस्य देहनिधने कथयामि दुःखं जानीहि तद् गुरुशुचा मनसा त्वमेव ॥

**प्रश्न ६ अधः प्रदत्तयोः कञ्चिदेकं प्रश्नं विशदयत ।** १०

१ तृतीयाङ्कस्य सारांशं लिखत ।

२ अश्वत्थाम्नः चरित्रचित्रणं कुरुत ।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानां लघूत्तराणि लिखत ।** १०

१ वेणीसंहारनाटकस्य रचयिता कः ?

२ वेणीसंहारे प्रथमश्लोके किं वृत्तम् ?

३ प्रथमाङ्कस्य कति श्लोकाः ?

४ वेणीसंहारनाटकस्य रचयितुः गोत्रं किम् ?

५ अस्य नाटकस्य मुख्यनायकः कः ?

६ अस्य नाटकस्य प्रतिनायकः कः ?

७ द्वितीयाङ्के कति श्लोकाः ?

८ भानुमती कस्य भार्या ?

९ नाटके पुरुषपात्राणि कति सन्ति ?

१० अभिमन्युः कस्य पुत्रः ?

११ अर्जुनस्य सखा कः ?

१२ तृतीयाङ्के कति श्लोकाः ?

१३ द्रोणाचार्यस्य पुत्रस्य नाम किम् ?

१४ गुरुद्रोणाचार्यस्य श्यालकः कः ?

१५ सूतः इत्यस्य कोऽर्थः ?